नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

| Question Booklet No. |
|---|
| |

No. of Questions – 18

No. of Printed Pages – 11

**S-71-Sanskritam (T.L.)**

# माध्यमिक पूरक परीक्षा, 2026

# SECONDARY SUPPLEMENTARY EXAMINATION, 2026

## तृतीय भाषा – संस्कृतम्

## Third Language – Sanskritam

**समय : 3:15 (सपादहोरात्रयम्)**

**पूर्णाङ्क : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशा :**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामाङ्कः अनिवार्यतः लेख्यः ।

2) **सर्वे** प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्ड – अ

1. बहुविकल्पात्मकप्रश्नाः । **[18×1=18]**

i) 'शुचिपर्यावरणम्' इति पाठानुसारेण अत्र जीवितं कीदृशं जातम् ? **[1]**
अ) सरलम् ब) दुर्वहम्
स) रुचिकरम् द) मनोहरम्

ii) 'बुद्धिर्बलवती सदा' इति पाठस्य आधारेण व्याघ्रः कस्माद् बिभेति ? **[1]**
अ) सिंहात् ब) जम्बुकात्
स) गजात् द) मानुषात्

iii) केन सम्बन्धेन वाल्मीकिः लवकुशयोः गुरुः ? **[1]**
अ) अध्यापनेन ब) उपनयनोपदेशेन
स) परम्परया द) आदरभावेन

iv) नराणां प्रथमः शत्रुः कः ? (''सुभाषितानि'' पाठानुसारेण) **[1]**
अ) लोभः ब) ईर्ष्या
स) क्रोधः द) दीर्घसूत्रता

v) प्राणिनां हानिः कस्माद् जायते ? **[1]**
अ) परस्परविवादतः ब) मैत्रीभावात्
स) प्रेमभावात् द) उपेक्षाभावात्

vi) प्राणेभ्योऽपि कः रक्षणीयः ? **[1]**
अ) प्राणवायुः ब) सदाचारः
स) देहः द) गर्वः

vii) एक एव खगो मानी वने वसति चातकः । अत्र रेखाङ्कितपदस्य अर्थः कः ? **[1]**
अ) जन्तुः ब) वानरः
स) पक्षी द) मनुष्यः

viii) अतिदीर्घः प्रवासोऽयं दारुणः च । अत्र रेखाङ्कितपदस्य कोऽर्थः । **[1]**
अ) भयङ्करः ब) सुन्दरः
स) मनोहरः द) आह्लादकरः

ix) योजकः + तत्र इत्यस्य सन्धिपदं किम् ? **[1]**
अ) योजको तत्र ब) योजकस्तत्र
स) योजक तत्र द) योजकश्तत्र

x) इत्युक्त्वा अत्र सन्धिविच्छेदोऽस्ति । **[1]**

अ) इति + उक्त्वा　　ब) इति + युक्त्वा

स) इत + उक्त्वा　　द) इत् + युक्त्वा

xi) श्चुत्वसन्धेः उदाहरणम् अस्ति । **[1]**

अ) चिन्मयः　　ब) ममैव

स) रक्तमपि　　द) सच्चित्

xii) महावृक्षः अत्र कः समासः ? **[1]**

अ) द्विगुः　　ब) कर्मधारयः

स) अव्ययीभावः　　द) बहुव्रीहिः

xiii) 'सह' इति पदयोगे का विभक्तिः भवति ? **[1]**

अ) प्रथमा　　ब) सप्तमी

स) तृतीया　　द) पञ्चमी

xiv) धिङ् माम् एवं भूतम् । अत्र रेखाङ्कितपदयोगे का विभक्तिः प्रयुक्ता ? **[1]**

अ) द्वितीया　　ब) तृतीया

स) चतुर्थी　　द) सप्तमी

xv) नमः इति शब्दयोगे का विभक्तिः प्रयुज्यते ? **[1]**

अ) पञ्चमी　　ब) तृतीया

स) सप्तमी　　द) चतुर्थी

xvi) ______________ पाठः पठ्यते । अत्र पूरणीयं समुचितं पदं किम् ? **[1]**

अ) छात्राय　　ब) छात्रेण

स) छात्रात्　　द) छात्रे

xvii) भगिनी प्रातः (9:30) ____________ वादने विद्यालयं गच्छति । अत्र समुचितसमयवाचकः शब्दः कः ? **[1]**

अ) सार्धाष्ट　　ब) पादोनदश

स) सपादनव　　द) सार्धनव

xviii) राजा तु रक्षकः ______________। रेखाङ्कितपदस्य समुचितं क्रियापदं किम् ? **[1]**

अ) भवति　　ब) भवन्ति

स) भवामि　　द) भवसि

**2.** निर्देशानुसारं रिक्तस्थानानि पूरयत ।

i) यूयं सर्वे ________ मे प्रियाः । (तथा, एव, इव) **[1]**

ii) दुष्कराणि ________ कर्माणि मतिवैभवशालिनः । (एव, च, अपि) **[1]**

iii) ________ राजसिंहः नाम राजपुत्रः वसति स्म । (तत्र, अधः, सहसा) **[1]**

iv) तर्हि त्वया अहं ________ । (हन् + तव्यत्) **[1]**

v) इयती वेला ________ । (सञ्जात + टाप्) **[1]**

vi) ________ गुणंवेत्ति न वेत्ति निर्गुणो । (गुण + इनि) **[1]**

**3.** अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

परितः आवृणोति सर्वान् अस्मान् यत् तत् पर्यावरणं कथ्यते । अद्यत्वे सर्वत्र पर्यावरणसंरक्षणस्य चिन्ता व्याप्नोति । स्वच्छं पर्यावरणं मानवजीवनाय अपेक्षितं भवति । प्रदूषितं पर्यावरणं विनाशाय कल्पते । अद्य प्रायः लोभैषणा वर्धते । मर्यादाः भज्यन्ते, नाद्रियते प्राकृतिकं जीवनम् । महाभारतेऽपि लिखितम् ''वनेन रक्ष्यते व्याघ्रः, व्याघ्रेण रक्ष्यते वनम्'' इति । यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम तदैव अस्माकं जीवनं शान्तिमयं सुखमयं च भवितुं शक्नोति ।

क) एकपदेन उत्तरत **[1×2=2]**

i) प्रदूषितं पर्यावरणं कस्मै कल्पते ? **[1]**

ii) जनैः किं न आद्रियते ? **[1]**

ख) पूर्णवाक्येन उत्तरत – **[2]**

अस्माकं जीवनं कथं शान्तिमयं सुखमयं च भवितुं शक्नोति ?

ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **[1]**

घ) भाषिककार्यम् । **[1×3=3]**

i) 'वर्धते' इति क्रियापदस्य कर्तृपदं किम् ? **[1]**

ii) स्वच्छं पर्यावरणं मानवजीवनाय अपेक्षितं भवति । वाक्येऽस्मिन् विशेषणपदानि कानि ? **[1]**

iii) स्वच्छम् इति पदस्य विलोमपदं किम् ? **[1]**

## खण्ड – ब

4. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संस्कृतशब्देन समयलेखनं करणीयम् । **[1+1=2]**

   i) जनकः प्रातः (8:30) _______ अल्पाहारं करोति । **[1]**

   ii) अहं रात्रौ (10:00) _______ निद्रां करोमि । **[1]**

5. 'गणेशं नमः ।' इति वाक्यं संशोधयत । **[2]**

6. 'आचार्यः ग्रन्थं पठति ।' इति वाक्यस्य वाच्यपरिवर्तनं कृत्वा लिखत । **[2]**

7. दशाननः इति पदस्य विग्रहं कृत्वा समासस्य नाम अपि लिखत । **[2]**

8. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गं भावार्थं लिखत । **[2]**

   सेवितव्यो महावृक्षः फलच्छाया समन्वितः ।
   यदि दैवात् फलं नास्ति छाया केन निवार्यते ।।

9. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत । **[2]**

   अमन्त्रमक्षरं नास्ति, नास्तिमूलमनौषधम् ।
   अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः ।।

   अन्वयः – ____(i)____ अक्षरं नास्ति । ____(ii)____ मूलं नास्ति ।
   (कोऽपि) अयोग्यः ____(iii)____ नास्ति । ____(iv)____ दुर्लभः । (अस्ति) ।

   | योजकः, अनौषधम्, अमन्त्रम्, अयोग्यः |
   |---|

## खण्ड – स

10. निम्नलिखितवाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत । **[1×3=3]**

   क) <u>व्याघ्रं</u> दृष्ट्वा धूर्तः शृगालः अवदत् । **[1]**

   ख) काकः <u>पिकस्य</u> सन्ततिं पालयति । **[1]**

   ग) सः <u>भारवेदनया</u> क्रन्दति स्म । **[1]**

11. ''बुद्धिर्बलवती सदा'' इति पाठस्य सारं हिन्दीभाषया लिखत । **[3]**

   **अथवा**

   ''विचित्रः साक्षी'' इति पाठस्य सारं हिन्दीभाषया लिखत । **[3]**

**12.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

वनस्य दृश्यं समीपे एवैका नदी प्रवहति । एक: सिंह: सुखेन विश्राम्यति, तदैव एक: वानर: आगत्य तस्य पुच्छं धुनाति । क्रुद्ध: सिंह: तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढ: । तदैव अन्यस्माद् वृक्षाद् अपर: वानर: सिंहस्य कर्णमाकृष्य पुन: वृक्षोपरि आरोहति । एवमेव वानरा: वारं वारं सिहं तुदन्ति । क्रुद्ध: सिंह: इतस्तत: धावति, गर्जति परं किमपि कर्तुमसमर्थ: एव तिष्ठति ।

क) एकपदेन उत्तरत – **[1]**

क्रुद्ध: सिंह: कुत्र धावति ?

ख) पूर्णवाक्येन उत्तरत – **[2]**

सिंह: वानराणां किं कर्तुं समर्थ: भवति ?

ग) भाषिककार्यम् – **[1×2=2]**

i) समीपे एव एका नदी प्रवहति । अत्र विशेषणपदं किम् ? लिखत । **[1]**

ii) एक: सिंह: सुखेन विश्राम्यति । अस्मिन् वाक्ये क्रियापदं किम् ? **[1]**

**अथवा**

''बहून्यपत्यानि मे सन्तीति सत्यम् । तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि । यतो हि अयमन्योऽभ्यो दुर्बल: । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव । तथापि दुर्बले सुते मातु: अभ्यधिका कृपा सहजैव'' इति सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयम् अद्रवत् । स च तामेवम सान्त्वयत् – ''गच्छ वत्से ! सर्वं भद्रं जायेत ।''

क) एकपदेन उत्तरत – **[1]**

जननी सर्वेषु अपत्येषु कथं भवति ?

ख) पूर्णवाक्येन उत्तरत – **[2]**

आखण्डल: (इन्द्र:) सुरभिं किम् असान्त्वयत् ?

ग) भाषिककार्यम् – **[1×2=2]**

i) बहूनि अपत्यानि मे सन्ति । वाक्येऽस्मिन् विशेष्यपदं किम् ? **[1]**

ii) सर्वं भद्रं जायेत । अत्र क्रियापदं किम् ? **[1]**

**13.** अधोलिखितं श्लोकं पठित्वा एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिखत ।

एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ।।

क) एकपदेन उत्तरत – **[1]**

राजहंसेन कस्य शोभा भवेत् ?

ख) पूर्णवाक्येन उत्तरत – **[2]**

केन सरस: शोभा न भवेत् ?

ग) भाषिककार्यम् – **[1×2=2]**

i) सा इति सर्वनाम पदं कस्मै प्रयुक्तम् ? **[1]**

ii) एकेन राजहंसेन – अत्र विशेषणपदं किम् ? **[1]**

**अथवा**

एक एव खगो मानी वने वसति चातक: ।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ।।

क) एकपदेन उत्तरत – **[1]**

क: वने वसति ?

ख) पूर्णवाक्येन उत्तरत – **[2]**

मानिन: खगा: के सन्ति ?

ग) भाषिककार्यम् – **[1×2=2]**

i) म्रियते इति क्रियापदस्य कर्तृपदं किम् ? **[1]**

ii) पक्षी इति पदस्य अत्र पर्यायपदं किम् ? **[1]**

14. अधोलिखितं नाट्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

लवः – ननु भगवान् वाल्मीकिः ।

रामः – केन सम्बन्धेन ?

लवः – उपनयनोपदेशेन ।

रामः – अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि ।

लवः – न हि जानाम्यस्य नामधेयम् । न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति ।

रामः – अहो माहात्म्यम् ।

कुशः – जानाम्यहं तस्य नामधेयम् ।

रामः – कथ्यताम् ।

कुशः – निरनुक्रोशो नाम .....

रामः – वयस्य अपूर्वं खलु नामधेयम् ।

क) एकपदेन उत्तरत – **[1]**

किम् अपूर्वं वर्तते ?

ख) पूर्णवाक्येन उत्तरत – **[2]**

लवः कस्य नामधेयं न जानाति ?

ग) भाषिककार्यम् – **[1×2=2]**

i) न हि जानामि अस्य नामधेयम् । अत्र सर्वनामपदं किम् ? **[1]**

ii) ननु भगवान् वाल्मीकिः । अत्र विशेष्यपदं किम् ? **[1]**

**अथवा**

व्याघ्रचित्रकौ – अरे किं वनराजपदाय सुपात्रं चीयते ?

एतदर्थं तु आवामेव योग्यौ । यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या ।

सिंहः – तूष्णीं भव भोः । युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ ।

एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अत एव विचार विमर्शः प्रचलति ।

बकः – सर्वथा सम्यगुक्तम् सिंहमहोदयेन । वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् । परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् । अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति ।

सर्वे पक्षिणः – (उच्चैः) आम् आम् – कश्चित् खगः एव वनराजः भविष्यति इति ।

क) एकपदेन उत्तरत – [1]
कस्मै सुपात्रं चीयते

ख) पूर्णवाक्येन उत्तरत – [2]
सर्वे पक्षिण: किम् अवदन् ?

ग) भाषिककार्यम् – [1×2=2]

i) तूष्णीं भव भो: । अत्र क्रियापदं किम् ? [1]

ii) एतदर्थं तु आवामेव योग्यौ । वाक्येऽस्मिन् विशेषणपदं किम् ? [1]

## खण्ड – द

**15.** भवान् राजकीय उच्चमाध्यमिक विद्यालय–उदयपुरस्य दशमकक्षाया: छात्र: गौरव : अस्ति । भवत: भगिन्या: सम्मानसमारोह: आयोज्यते । तत्र भवानपि सम्मिलित: भवितुम् इच्छति, अत: स्वप्रधानाचार्याय तस्य दिनस्य अवकाशार्थं प्रार्थनापत्रं लिखतु । [4]

**अथवा**

भवती दीपिका अस्ति । पर्यावरणदिवसविषये स्वसखीं प्रति प्रदत्तमञ्जूषा पदसहायतया पदानि पूरयित्वा पत्रं लिखतु । [4]

| माम् , तान्, कामये, नमस्ते, उल्लासेन, पादपान् , एतत् , आचरसि |
|---|

दिनाङ्क : 10 फर 20xx

प्रियसखि मनोरमे

_____(i)_____ ।

कुशलिनी सती कुशलं _____(ii)_____ तव । पर्यावरणदिवस: सर्वजनै: महता _____(iii)_____ आचर्यते । अहं तस्मिन् दिने् शताधिकान् _____(iv)_____ रोपयिष्यामि । _____(v)_____ पादपान् रक्षिष्यामि च । _____(vi)_____ सुयोग्यदिनं त्वं कथम् _____(vii)_____ ? कृपया योजनां _____(viii)_____ अपि ज्ञापय ।

तव पत्राकाङ्क्षिणी

भवदी सखी

दीपिका

**16.** अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि लिखत । **[4]**

| |
|---|
| वनम् , मनोहरम् , गजक्रीडा, चित्रक:, शाखायाम् , वानर:, वदति, वृक्षा: |



**अथवा**

मञ्जूषात: उपयुक्तपदानि चित्वा ''प्रातर्विहार:'' इति विषये संवादं पूरयत । **[4]**

| |
|---|
| श्व:, आवाम्, मित्र, अस्वास्थ्यम्, करोषि, आरभताम्, प्रतिदिनम्, जन: |

सौरभ: – सात्विक ! किं त्वं प्रातर्विहारं ____(i)____ ? अहं तु ____(ii)____ गच्छामि ।

सात्विक: – न हि सौरभ ! मम ____(iii)____ जातम् आसीत्, तदारभ्य न आरब्धम् ।

सौरभ: – ____(iv)____ प्रातर्विहारेण तु शीघ्रमेव ____(v)____ स्वस्थ: भवति अत: ____(vi)____ आरभ्य ____(vii)____ ।

सात्विक: – ____(viii)____ सहैव चलिष्याव : । अहं तवगृहम् आगमिष्यामि ।

**17.** अधोलिखितवाक्येषु केषाञ्चन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरुत । **[4]**

i) आचार्य गणित पढ़ाता है ।

ii) मेरी माता वैद्या है ।

iii) आपके मित्र को मेरा नमस्कार है ।

iv) हम सब जयपुर जायेंगे ।

v) मैं स्वस्थ हूँ ।

vi) जल जीवन है ।

**18.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखत । **[3]**

i) स: प्रातर्विधिं सम्पादयति ।

ii) कार्यालय: दशवादने उद्घाटित: भवति ।

iii) स: सायं कारयानेन गृहम् आगच्छति ।

iv) जनक: प्रात: पञ्चवादने उत्तिष्ठति ।

v) तत्र गत्वा कार्यालयकार्यं करोति ।

vi) वयं सर्वे रात्रिभोजनं सहैव कुर्म: ।

**अथवा**

मञ्जूषायां प्रदत्तशब्दानां सहायतया ''परोपकार:'' इति विषये एकम् अनुच्छेदं (षड्वाक्यात्मकम्) संस्कृतभाषया लिखत । **[3]**

| |
|---|
| परेषाम् उपकार:, प्रकृति:, माता, गाव:, फलानि, परोपकाराय |

DO NOT WRITE ANYTHING HERE